कविकुलगुरू कालिदास संस्कृत विश्वविद्यालय रामटेक

हस्तलिखित संग्रह

दाखल.क्र. M-3003 विषय ज्यौतिष

नाव षट्पंचाशिका सटीक

लेखक/लिपीकार

पृष्ठ 25 काळ पुर्ण/ अपुर्ण

अथषट्पंचाशिकासटी०प्रा०



श्रीगणेशायनमः केशाजार्कनिशाकरान्क्षितिजविज्जीवास्फुजित्सूर्यजान्विघ्नेशांस्त्वगुरुंप्रणम्यशिरसादेवींच-
वागीश्वरीं प्रश्नज्ञानवलोवराहमिहिरापत्यस्यसद्गुरुक्तनोलोकानांहितकाम्ययाद्विजवरष्टीकांकरोत्युत्पलः १ का
नीहशास्त्रेसंबंधाभिधेयप्रयोजनानिभवंतीत्युच्यते आब्रम्हादिविनिश्चिनमिदंवेदांगमितिसंबंधः लग्नहोराद्रे
ष्काणनवांशसप्तांशकादिनाग्रहसंस्थानदर्शनेनचजयपराजयलाभालाभत्दननष्टादिपरिज्ञानमभिधेयं अन्य
त्रशुभाशुभकथनादिहलोकपरलोकसिध्धिरितिप्रयोजनं किमेभिरुक्तैरित्युच्यते सर्वस्यैवहिशास्त्रस्य कर्म-
णोवापिकस्यचित् यावत्प्रयोजनंनोक्तंतावत्केननगृह्यते कस्मिन्शास्त्रेधिकारः उच्यतेद्विजस्यैव यतो
नषडंगोवेदोऽध्येतव्योज्ञातव्यश्चकान्यंगानीत्युच्यते शिक्षाकल्पोव्याकरणंनिरुक्तंज्योतिषांगतिः छंदसांलक्ष
णंचैवषडंगोवेदउच्यते इतिसतामयमाचारोयच्छास्त्रस्यारंभेष्वभिमतदेवतानमस्कारंकुर्वंति तदायमपि
आवंतिकाचार्योद्विजोवराहमिहिरात्मजः पृथुयशाः संक्षिप्तांप्रश्नविद्यांस्वसूत्रैः कर्तुकामः आदावेवभगवतः
श्रीसूर्यस्यनमस्कारंस्वनामाख्यापनंचप्राह प्रणिपत्येति वराहमिहिराख्यस्याचार्यस्यआत्मजेन पुत्रेण पृ

षट्.टि.
१

धृदशःसा पृथुयशाइत्यभिधानंयस्य तेनरविंसूर्यं मूर्ध्नाशिरसाप्रणिपत्य नमस्कृत्य प्रश्ने प्रश्नविषये इयं
प्रश्नविद्याकृता रचिता कीदृशी अर्थगहना अर्थोभिधेयं गहनोगुह्योयस्याः साअर्थगहना किमर्थं परार्थमु
द्दिश्य परेषां लोकानां अर्थः प्रयोजनं परार्थमुद्दिश्याभिधाय कीदृशेन पृथुयशसा सद्यशसा सत् शोभनं
यशः कीर्तिर्यस्य तथाभूतेन विद्याशौर्यादि गुणयुक्तेनेत्यर्थः १ अधुना लग्नचतुर्थसप्तमदशमानांचतु

प्रणिपत्यरविंमूर्ध्नावराहमिहिरात्मजेनपृथुयशसा प्रश्नेकृतार्थगहनापरार्थमुद्दि
श्यसद्यशसा १ च्युतिर्विलग्नाद्धिबुकाच्चवृद्धिर्मध्यात्प्रवासोस्तमयान्निवृत्तिः

र्णांस्थानानांविचारप्रविभागमाह च्युतिरिति च्युतिःच्यवनंस्थानपरिभ्रंशः विलग्नात्कालिकात् पृच्छाल
ग्नात् च्युतिर्ज्ञेया पृच्छांपृच्छति अमुकस्थानान्मेच्युतिर्भविष्यतिवानेत्येतद्विलग्नाज्ज्ञेयं एवंहिबुकाच्चतुर्थ-
स्थानात् गृहक्षेत्रखलानांवृद्धिर्ज्ञेया मध्यंदशमस्थानं तस्मात्प्रवासोज्ञेयः प्रवसनंप्रवासः अन्यदेशगमनं अ

हो.अ.
१

१

स्तमयात्सप्तमस्थानात् निवृत्तिः प्रवासान्निवर्त्तनं कथमेवमुच्यते चरस्थिरद्वि:स्वभावात्मकत्वेन यतउक्तं
प्रश्नविलग्नकालात् प्रश्नः पृच्छाप्रश्नेविलग्नंप्रश्नविलग्नंतस्यकालः समयस्तस्मात् तेनचरराशौलग्नगतेस्वामि
नाकृतेदृष्टेवाशुभग्रहाणामन्यतमेनवाकृतेदृष्टेपरिशिष्टग्रहसंयोगसंदर्शनरहितेच्चकृतिर्भवति अन्यथानभ
वत्येव यतउक्तं वाच्यंग्रहे:कारणभूतैः वाच्यंवक्तव्यं सर्वमेवैतत् एवंस्थिरराशौपापग्रहदर्शनयोगरहि
तेपिनभवत्येवयतोवक्ष्यति वृषसिंहवृश्चिकघटं स्थिति स्थानंगमागमौनस्तइति तथाद्विस्वभावेनवा
स्वामिशुभग्रहदर्शनाधिक्यात्पापानामल्पत्वाच्चभवति अन्यथानभवत्येव एवंचतुर्थस्थानस्यसामान्य
तयेवशुभग्रहस्वामिदर्शनयोगात् ग्रहादीनां स्थितिः अन्यथापचयः अथोप्रवासः दशमस्थानस्यचर
राशयात्मकत्वात् पापग्रहदर्शनात्प्रवासः अन्यथास्वामिशुभग्रहदर्शनयोगाच्चनप्रवासः सप्तमस्थान
स्यचरराशयात्मकत्वात् पापग्रहदर्शनान्नप्रवासान्निवृत्तिः अ न्यथास्वामिसौम्यग्रहदर्शनयोगाच्च निवृ
त्तिः गृहंप्रविष्टो हिबुकेप्रवासी हिबुकेचतुर्थस्थानेप्रवासीविदेशस्थो नरोगृहं वेश्मप्रविष्टोनचेतिवक्त

ष० पं०
२

व्यं चतुर्थस्थानस्य स्वामि दृष्टे एकस्के वा गृहं प्रविष्टोऽन्यथा न प्रविष्ट इति हिबुकगृहे प्रविष्टे गृहं प्रविष्टं
प्रवासिनं विद्धि हिबुकात्सप्तमया नरगे ग्रहे च पथि वर्त्तते पुरुष इति तस्य प्रविष्टस्य ग्रहस्य यावंति दिनानि
व्यतीतानि तावंत्येव गृहं प्रविष्टस्य प्रवासिनो गतानि अथवाङ्घ्रिदिनैः मध्य इः चतुर्थस्थाने यास्यति तावद्धि

वाच्यं ग्रहैः प्रश्नविलग्नकालाद्गृहं प्रविष्टो हिबुके प्रवासी २

रेव प्रवासी गृहं प्रविशयति एतद्दूरगतस्यागमनं चेत् यस्मिन्वक्ष्यमाणे यातेसति वक्तव्यं नान्यथेति एतच्च
पुरस्ताद्विस्तरेणाभिधीयत इति २ अधुनानन्वादीनां द्वादशभावानां शुभाशुभज्ञानमाह योयो भाव इति
तनुधनसहजसुहृत्सुतरिपुजायामृत्युधर्मकर्मायव्ययाइतिद्वादशभावाउक्ताः कुजशुक्रज्ञेंदुर्कज्ञशुक्र

हो० अ०
१

कुजजीवसौरियमगुरवः इतिराश्यधिपाउक्ताः तथाक्षीणेंदुर्कयमाराः पापास्तैः संयुतः सौम्यइतिग्रहाणां
पापसौम्यत्वमुक्तं तथादन्नामतृतीयेनवपंचमेचतुर्थाष्टमेकलत्रेंच पन्नयंनिपारदृष्ध्याफलानिचैवंग्रयच्छंति सर्वमे
तत् दृष्टिफलमुक्तं वेनपृच्छासमयेयः कश्चिद्भावस्तन्वादिकः स्वामिनात्मीयनाथेनदृष्टोऽवलोकितः तस्यभावस्य
वृध्धिरुपचयोक्तिविद्यते अथवावैनैवस्वामिनायुतः संयुक्तः तस्यापिवृध्धिरस्तिसौम्यैर्वास्यात् सौम्यग्रहाणां बुध

योयोभावः स्वामिदृष्टोयुतोवा सौम्यैर्वास्यात्तस्यतस्यास्तिवृध्धिः पापैरेवंतस्यभावस्यहानि
र्निर्दिष्टव्या पृच्छतांजन्मतोवा २

गुरुशुक्रपूर्णचंद्राणांअन्यतमेनवायुतोदृष्टोभावः स्यात् भवेत् तस्यापिवृध्धिरस्तिवर्धनं वक्तव्यं पापैरेवमिति
एवमनेनप्रकारेणपापैः पापग्रहैरपिरविक्रूरयुतबुधभौमसौरिक्षीणचंद्राणामन्यतमेनयोयोभावोयुक्तोदृष्टोवा
तस्यभावस्यहानिरपचयोनिर्दिष्टव्योवक्तव्य कस्मादितितदेवाह पृच्छतांजन्मतोवेति पृच्छासमयेनराणांजन्म-
तोवाजायमानानांतथाचोक्तंजातके पुष्णंतिशुभाभावान्सूर्यादीन्घ्नंतिसंस्थिताः पापाः सौम्याः षष्ठेरिपाः

षट्पं·
३

सर्वैर्नेष्टाव्ययाष्टमगाः इतिजन्मन्याधानकालेप्रश्नकालेवेति ३ अथकनाप्रश्नसमयेलाभादौशुभाशुभज्ञान

माह सौम्यइतिसौम्यानां शुभानांग्रहाणांबुधगुरुशुक्र पूर्णचंद्राणामन्यतमेविलग्नेस्थितेयदिवास्यसौ-

म्यग्रहस्यवर्गेतत्कालंविलग्नेप्राप्तेग्रहहोराद्रेष्काणनवमभागद्वादशांशात्रिंशांशः वर्गः प्रत्येतव्योग्रहस्ययोय

स्यनिर्दिष्टइतिवर्गलक्षणमुक्तं अथशीर्षोदयेपृच्छालग्नेमेषाद्याश्चत्वारः सधन्विमकराः क्षपाबलाज्ञेयाः पृ-

सौम्येविलग्नेयदिवास्यवर्गेशीर्षोदयेसिध्दिमुपैतिकार्यं

अतोविपर्यस्तमसिध्दिहेतुः कृच्छ्रेणसंसिध्दिकरंविमिश्रं ४

ष्ठोदयाविमिथुनाविरसान्येहकभयतोमीनः इतिराशिपृष्ठोदयत्वंशीर्षोदयत्वंचोक्तं एतेषामन्यतमेयदिविलग्ने

पृच्छतोभवति तत्कार्यसिध्दिंसाध्यतामुपैतिगच्छति अतोविपर्यस्तमिति अतोस्मात्पूर्वोक्ताद्विपर्यस्तंविपरी

तमस्ति असिध्दिहेतुरसाध्यतायाः कारणं एतदुक्तंभवति पापग्रहेणविलग्नस्थेनपापवर्गेवाविलग्नगतेपृ-

ष्ठोदयेवालग्नगतेपृष्टुः कार्यंनसिध्यति कृच्छ्रेणसंसिध्दिकरंविमिश्रं नत्पूर्वोक्तंविमिश्रितंसंकीर्णयदिभवेत्तदा

हो·भ
१

३

प्रष्टुः कृच्छ्रेणक्लेशेनसंसिद्धिकरं कार्यसाधकंभवति एतदुक्तंभवति पाप सौम्यौद्वावपिलग्नस्थौभव
तः पापसौम्यौवर्गस्थौवाउभयोदयोमीनोवाशीर्षोदयः पापयुक्तः पापवर्गस्थोवापृष्ठोदयः सौम्ययुक्तः
सौम्यवर्गस्थोवाउभयोदयोवातदाक्लेशेनसिद्धिकृद्भवति तत्रचबलाधिक्यान्निश्चयइति ४ अधुनानष्टलाभज्ञा
नमाह होरास्थितइति शशांकश्चंद्रः पूर्णतनुः परिपूर्णमंडलः दशम्यामारभ्य कृष्णापंचमीयावत्पूर्ण

होरास्थितः पूर्णतनुः शशांकोजीवेनदृष्टोयदिवासितेन क्षि
प्रंप्रनष्टस्यकरोतिलब्धिंलाभोपयातोबलवान्शशभश्च ५

तनुर्भवति तथाचयवनेश्वरः मासेचशुक्लप्रतिपत्प्रवृत्ते पूर्णः शशीमध्यबलोदशाहे श्रेष्ठोद्वितीयेत्सब-
लस्तृतीयेसौम्यैस्तुदृष्टोबलवान्सदैव एवंपूर्णतनुः शशांकः होरायांलग्नेस्थितः होरेतिलग्नभवनस्यचा-
र्द्धमिति लग्नस्यहोराव्यपदेशः तत्रस्थः शशीजीवेनगुरुणादृष्टोवलोकितः यदिवासितेनशुक्रेणदृष्टोभ
वति यदित्येयंनिपातोविकल्पे क्षिप्रमाश्वेव प्रनष्टस्यापहृतस्यद्रव्यादेर्लब्धिंलाभंकरोति लाभोपयातइ

पं. ४

ति अथवाशुभः सौम्यग्रहः बलवान्वीर्यफतः लाभे एकादशेस्थाने उपयातः प्राप्तो भवति तथापिच
शब्दात्क्षिप्रमेव नष्टस्य लाभं करोतीति ग्रहाणां स्थान दिक्चेष्टा काल बलं जातकेप्रोक्तं बलवानुमित्रस्य
गृहोच्चैरित्यारभ्य स्वदिनादिषु शुभस्तु भाइत्येतदंतं ५ अधुनाहृतनष्टमुष्टिगतचिंतितानां धातुमूलजी-
वानां परिज्ञानमाह स्वांशेतिय: कश्चिद्ग्रहः तत्कालं स्वांशो आत्मीयनवांशके स्थितः विलग्ने भ लग्ने तत्का
स्वांशो विलग्ने यदि वा त्रिकोणे स्वांशे स्थितः पश्यति धातुचिंतां परांशकस्थश्च क
रोति जीवं मूलं परांशो परतः परांशं ६
लोदितं स्वांशं तस्यैव ग्रहस्यात्मीयं नवांशकं तच्च पश्यत्यवलोकयति तदा प्रष्टुः धातुचिंतां वदेत् रूपवर्णा
दि मृत्तिकां तं धातुद्रव्यं एतदुक्तं भवति स्वांशकस्थो ग्रहः स्वांशकयुक्तं लग्नं पश्यति तदा धातुचिंतां प्रवदे
त् अथवा लग्नगतं स्वांशं न पश्यति तदा त्रिकोणे नवमस्थाने स्थितं तमेव स्वांशं पश्यति पंचमे स्थितं तमेव-
स्वांशं पश्यति नवमस्थानं पंचमस्थानं वा स्वांशकसमेतं पश्यतीत्यर्थः यतो लग्नपंचमनवमानामैक

हो॰ अ॰ १

४

एवांशः तुल्यकालमुदेति एतदुक्तं भवति स्वनवांशकस्थो ग्रहो लग्नं पंचमनवमानामन्यतमं स्वांशकफलं प-
श्यति तदा धातुं चिंतां वदेत् तत्रापि धाम्याधाम्यप्रविभागो ग्रहांशकवशाद्वाच्यः पापग्रहांशकमवस्थितस्य
धाम्यं सौम्यग्रहांशकमवस्थितस्याधाम्यमिति परांशकस्थस्तु करोति जीवमिति यः कश्चिद्ग्रहः परनवांशक
स्थो अन्यग्रहनवभागावस्थितो विलग्नगतं स्वांशं पश्यति त्रिकोणयोरन्यतमगतं वा तदा जीवचिंतां वदेत्
पुरुषादि सरीसृपांतो जीवः तत्रापि ग्रहफलं नवांशकवशात् द्विपदसरीसृपादिविभागः मिथुनकन्या-
तुलाधनुः पूर्वार्धं कुंभः द्विपदा ज्ञेयाः मेषवृषसिंहधन्वि परार्धाश्चतुष्पदाः कर्कवृश्चिकमकरमीनाः
सरीसृपाः तत्र मीनोत्यपदः अन्ये तु बहुपदाः मूलं परांशोपगतः परांशमिति यः कश्चिद्ग्रहः परांशोप
गतोन्यग्रहनवांशके समवस्थितो विलग्नगतं परनवांशकं त्रिकोणयोरन्यतमगतं वा पश्यति तदा मूलं करोति
मूलचिंतां प्रवदेत् एतद्यतः प्रायः संभवति तत् ग्रहदर्शनात् ज्ञेयं वृक्षादितृणांतं मूलं तत्रापि ग्रहफलं न
वांशकवशात् स्थलजलत्वं ज्ञेयं कर्कमकरमीनाः जलजाः अन्ये तु सर्वे स्थलजा इति तथा च चिंतासिद्धिं

षट्
५

प्रश्नज्ञानमुक्तं स्वांशोस्थितोविलग्नेयदाग्रहः स्वांशार्कंनिरीक्षेतधातोस्तदातुचिंतांकरोति परसंस्थितो हो॰अ॰
जीवं परभागसन्निविष्टः परांशार्कंप्राग्विलग्नमायातं पश्यतिमूलंप्रवदेदेवंनवपंचमेज्ञेयं ८ एतदेवपु १
नरपिप्रकारांतरेणाह धातुमिति मेषमिथुनसिंहतुलाधनुःकुंभाःओजराशयः वृषकर्ककन्यावृश्चिक
मकरमीनायुग्मराशयः तत्रओजेविषमेराशौलग्नगते प्रथमनवमांशकोदयेधातुंधातुचिंतांप्रवदेत्

धातुंमूलंजीवमित्योजराशौयुग्मेविंद्यादेतदेवप्रतीपं

द्वितीयेमूलंतृतीयेजीवं पुनरपिचतुर्थेधातुं पंचमेमूलं षष्ठेजीवं पुनःसप्तमेधातुं अष्टमेमूलं नवमेजीव-
मिति युग्मेविंद्यादेतदेवप्रतीपं युग्मेयुग्मराशौसमराशावितियावत् लग्नगतेनवांशकक्रमेणैतदेवपूर्वो
क्तंप्रतीपंविपर्ययेणविंद्यात्जानीयात् तेनप्रथमनवांशकोदयेजीवं द्वितीयेमूलं तृतीयेधातुं पुनश्चतु
र्थेजीवंपंचमेमूलं षष्ठेधातुं पुनःसप्तमेजीवं अष्टमेमूलं नवमेधातुमिति एवमनेनप्रकारेण क्रमात्परि ५

पात्या लग्ने विलग्ने योंशो यो नवमभागः तत्कालमुदितः सयावद्भ्ययोगणनीयः अत्र च लग्नं नवांशाकस्य द्रा
त्भाग्वद्यो विभागः केचिद्द्रेष्काणत्रितयेयथासंख्यं धातुं मूलं जीवमित्योजराशौ यग्मेविंद्यादेतदेव प्रतीप-
मिति वर्णयंति तच्चायुक्तं यस्मात्पुरस्तादाचार्यएव वक्ष्यति अंशकाज्ज्ञायते द्रव्यमिति अयं संक्षेपः समास
उक्तः विस्तरात्व्यासेनास्यैवार्थस्य प्रभेदः स्पष्टता अभिधीयत इति ७ इति श्रीभट्टोत्पलविरचितायां
लग्नेयोंशास्तत्क्रमाद्गण्य एव संक्षेपोयं विस्तरात्तत्प्रभेदः ७ इति वराहमिहि
रात्मजपृथुयशो विरचितायां षट्पंचाशिकायां होराध्यायः प्रथमः १ वृषसिं
हवृश्चिकघटे र्विद्धिस्थानं गमागमौ नस्त्तः

षट्पंचाशिकायां होराविवृतौ संक्षेपात् होराध्यायः प्रथमः १ अथातो गमागमाध्यायो व्याख्यायते
तत्रादावेवस्थान गमागमर्जीवितमरणारोगशांतिपराभिभवज्ञानमाह वृषसिंहेति वृषसिंहवृश्चिक

षट्॰टी॰ प्रसिद्धाः घटः कुंभः एते स्थिरराशयः एतैर्वृषसिंहवृश्चिकघटैः एतेषामन्यतमे लग्ने प्राप्ते स्थाने विद्धि ग॰अ॰
६ जानीहि पृष्टुः स्थानलाभो भवति गमागमौ न स्तः गमश्च आगमश्च गमागमौ तौ न स्तः न भवतः न मृ २
तं मृतं मरणं न भवति जीवत्येव न चापि नष्टं धान्यादिद्रव्यं धनं अदर्शनपथिस्थितं न नष्टं न नाशं प्राप्तं अ
थवा विदेशस्थो नरस्तस्मात् स्थानात् न नष्टः अन्यदेशं न गतः न रोगशांतिः रोगो ज्वरादिः तस्य

न मृतं न चापि नष्टं न रोगशांतिर्न चाभिभवः १ न हि परीतं तु चरैर्द्विशरीरैर्मिश्रितं फलं भवति

शांतिः शमनं व्याध्यभिभूतस्य न भवति न चाभिभवः अभिभवः पराजयः सः शत्रोः सकाशात् न भव
ति १ न हि परीतं तु चरैरिति चराः मेषकर्कटतुलामकराः तदित्यनेनानंतरोक्तं विद्धिस्थानमित्यादिकं सर्वं प्रत्य
वमृश्यते चरैः चराभिधानैः पृच्छालग्नस्थैः तत्फलमनंतरोक्तं विपरीतं विपर्ययाद्भवति पूर्वमुक्तं विद्धिस्थान
मिति तत्र चरैः स्थानप्राप्तिर्नास्तीति वाच्या गमागमौ न स्त इति पूर्वमुक्तं चरैर्गमागमौ विद्येते पूर्वमुक्तं न मृतः च ६

रैर्मृतइतिवक्तव्यं पूर्वमुक्तंनचापिनष्टं चरैर्नष्टमितिवाच्यं पूर्वमुक्तंनरोगशांतिः चरैःरोगशांतिर्भवतीति
वाच्यं पूर्वमुक्तंनचाभिभवः चरैरभिभवोभवतीतिवक्तव्यं द्विशरीरैर्मिश्रितंफलभवतिइति द्विशरीराः-
द्विस्वभावाःमिथुनकन्याधन्विमीनाः तैःपृच्छालग्नेमिश्रितंफलंभवति यत्स्थिरैरुक्तंयच्चरैरुक्तं तन्मिश्रि
तमुभयंफलंभवति भवतिनभवतीतिवासर्वमेतद्यथोद्दिष्टं तत्रायंनिश्चयः द्विस्वभावलग्नेप्रथमेर्द्धेस्थिरव

लग्नेंद्वोर्वक्तव्यंसुभदृष्ट्याशोभनमतोन्यत् २

त्फलंसर्वंवदेत् द्वितीयेर्द्धेचरवत् यतस्तस्यप्रथमार्द्धं स्थिरसमीपवर्त्ति द्वितीयंचरसमीपवर्त्तीति तथाचा-
स्मरीये प्रश्नज्ञाने स्थिरराशौलग्नगतेस्थानप्राप्तिंवदेन्नचागमनंरोगीपशमोनाशोद्रव्याणांस्यात्पराभवो
नात्र चरराशौविपरीतंमिश्रंवाच्यंद्विमूर्त्त्युदये स्थिरवत्प्रथमेर्द्धेस्या दपरेचरराशिवत्सर्वमिति लग्नेंद्वोर्वक्त
व्यमिति लग्नंप्रश्नलग्नंइंदुश्चंद्रः तयोर्लग्नेंद्वोर्द्वयोरपि शुभदृष्ट्यासौम्यग्रहदर्शनेनशोभनंफलंवक्तव्यं देहमनोरूप

त्वात् लग्नेंदौसौम्यदृष्टौसंपत्करौभवतः अन्योन्यदितिअतोस्मादुक्ताद्विपरीतेन्यदशुभंवक्तव्यं तेनलग्नेंदू भद्रदृष्टौ
यदिभवतस्तदासर्वपृच्छास्वशोभनंफलंवक्तव्यं अर्थादेकैकस्मिन्नुभयदृष्टेमध्यमंफलंभवति २ अधुनायात्रायांमा
र्गनिवृत्तिज्ञानमाह रूतशत्रुगतैरिति रूतश्चशत्रुश्च रूतशत्रू अनयोर्गतैः रूतस्थानंपंचमं शत्रुस्थानंषष्ठं
अनयोर्द्वयोरपिस्थानयोः एकस्मिन्वापापैः सूर्यभौमशनिभिः प्रश्नलग्नात्गतैः समवस्थितैः मृत्युः शत्रुः रिपुः

रूतशत्रुगतैः पापैः शत्रुर्मार्गान्निवर्तते चतु
र्थगैरपिग्रामः शत्रुर्भग्नोनिवर्तते ३

मार्गात्पथः निवर्त्ततेगच्छति तैरेवपापैः लग्नाच्चतुर्थस्थानेसमवस्थितैः अपिशब्दः संभावनायांग्रामो-
पिशत्रुः निकटस्थो भग्नः पराजितोनिवर्तते प्रतीपंगच्छतीत्यर्थः ३ अथान्ययोगांतरमाह झषेति झषोसौ

मूलत्रिकोणंमित्रक्षेत्रंवाभवतितदाशुभमन्यथानशुभमित्यर्थः केचित् स्थिरेष्टमेपिवाशुभमितिपाठंपठंति स्थिरराशौ लग्नाष्टमापसंस्थःक्केवाशुभंप्राग्वदिति ५ अथशत्रोः गमागमज्ञानमाह स्थिरेशशीति स्थिरेस्थिरराशौ राशौचंद्रोभवति चरोदयेचरराशौलग्नगतेप्रश्नलग्नगतेप्रश्नकालेयदारिपोः शत्रोर्नचागमः आगमोनविद्यतेतदातस्मिन्नेवप्रश्ने- रिपोरागममागमनंवदेत्ब्रूयात् विपर्ययेविपर्ययमिति तस्मादेवपूर्वोक्ताद्विपर्यये अन्यथात्वेनिपर्ययं विपरीतमेव

स्थिरेराशौचरोदयेनचागमोरिपोर्यदा तदागमंरिपोर्वदेद्विपर्ययेविपर्ययं ६ स्थिरेतुलग्न मागतेद्विरात्मकेतुचंद्रमाः निवर्ततेरिपुस्तदाकृदूरमागतोपिसन् ७

वक्तव्यं एतदुक्तंभवति चरेराशिनिस्थिरराशौलग्नगतेयदि रिपोरागमनंश्रूयते तदातस्मिन्प्रश्नेनागच्छती- तिवदेत् ६ अथशत्रुनिवृत्तिज्ञानमाह स्थिरेत्विति स्थिरराशौलग्नगतेतत्काललग्नमागतेद्विरात्मकेद्विस्वभावेराशौयदाचंद्रमाः राशौभवतितदारिपुः शत्रुः कृदूरमागतोपिसन् स्वस्थानात्कृतरांदूरमागतोपिनिवर्ततेप्रती

न: अलिर्वृश्चिक: कुंभ कर्कटौ प्रसिद्धौ एतेरसातले लग्नाच्चतुर्थस्थाने स्थिता: एतेषामन्यतमा: प्रश्नलग्ना
च्चतुर्थस्थाने यदा समवस्थिता भवंति तदारिपो: शत्रो: पराजयोऽभिभवो भवति चतुष्पदे: पलायनमिति। मे
षवृषसिंहधन्विपरार्धाश्चतुष्पदा: एतेषामन्यतमे लग्नाच्चतुर्थस्थे शत्रो: पलायनमपसर्पणं भवतीत्यर्थ:
४ अथ यायिनां प्रतिशुभाशुभमाह चरोदय इति चरोदये चरराशिरूद्गमे तस्मिंश्च शुभग्रहाणां बुधजीवशु-

झषालिकुंभकर्कटा रसातले यदा स्थिता: रिपो: पराजयस्तदा चतुष्पदे: पलायनं ४
चरोदये शुभ: स्थित: शुभं करोति यायिनां अशोभनैरशोभनं स्थिरोदयेपि वाशुभं ५

क्राणामन्यतम: स्थितश्चेत् यायिनां गच्छतां शुभं श्रेय: करोति विदधाति तस्मिन्नेव चरोदये अशोभनै:
स्थितै: पापग्रहाणां रविभौमार्कजानामन्यतमे स्थिते तेषामेव यायिनामशोभनमश्रेय: करोति स्थिरोद
येपि वाशुभं स्थिरराणामन्यतमस्योदये पापसंपर्के विकल्पेन शुभं भवति तत्स्थाने पापग्रहस्य स्वक्षेत्रेउच्च

पंगच्छतीति अपिशब्दः संभावनायां ७ अथान्ययोगांतरमाह चरेशाशीति चरेचरराशौ शशीचंद्र
माभवति तथालग्नगतः प्राग्लग्नस्थो द्विदेहो द्विस्वभावो राशिर्यदा तस्मिन् काले पथोमार्गस्यार्धमागत्य-
निवर्त्तते प्रतीपंगच्छति तुशब्दोवधारणे विपर्ययइति विपरीते शत्रोरागमं द्विधाद्विः प्रकारेण स्याद्भवेत्
एतदुक्तं भवति द्विस्वभावराशिस्थे शशिनि चरराशौ लग्नगते शत्रोरागमनं बलयन्नभवेत् पराजयः स्यादशुभे

चरेशशीलग्नगतो द्विदेहः पथोर्द्धमागत्य निवर्त्तते रि
पुः विपर्यये चागमनं द्विधास्यात्पराजयः स्यादशुभेक्षिते तु ८

क्षिते त्विति तस्मिन्नेव विपरीते योगे विपरीते चंद्रे लग्ने वाशुभेक्षिते पापग्रहसंदृष्टे शत्रोः सकाशात् प्रष्टुः पराज
योभिभवः स्याद्भवेत् एतदुक्तं भवति द्विः स्वभावराशिस्थिते शशिनि चरराशौ लग्नगते द्वयोरपि पापदृष्ट
योः शत्रोरागमनं द्विधा भवति समागमश्च पराजयं करोतीत्यर्थः ८ अन्यदपि गमागममाह अर्केत्ति अ

षट्.पं
१

र्कः आदित्यः आर्किः सौरिः ज्ञः बुधः सितः शुक्रः एषांमध्येएकोपिग्रहोयदाचरोदयेचरराशौलग्नगते
स्थितोभवति तदाआशुक्षिप्रमेवयियासोर्गमनंवदेद्ब्रूयात् रविवर्ज्यमन्येषामेकतमोऽपियदाचरराशौ
लग्नगतोभवतिसचवक्रगतेःप्रतीपगतिमाश्रितोभवति तदायियासोर्गमनंनैतिवक्तव्यं यातोन-

अर्कार्किज्ञसितानामेकोपिचरोदयेयदाभवति
प्रवदेत्तदाशुगमनंवक्रगतेनैतिवक्तव्यं १

गच्छतीत्यर्थः १ अथयोगांतरमाह स्थिरोदयइति स्थिरराशौलग्नगतेयस्मिंश्चजीवशनैश्चरेक्षिते
बृहस्पतिसौरिभ्यांदृष्टे पृच्छतः प्रष्टुः गमागमौनैववदेत् नब्रूयात् शत्रुगमागमौनैवभवतइत्यर्थः
तस्मिन्नेवजीवशनैश्चरेक्षितेपापाःपापग्रहाः त्रिपंचषष्ठाः तृतीयपंचमषष्ठस्थानस्थाभवंति तदा
रिपोःशत्रोःसंगमायभवंतिप्रष्टुःशत्रुणासहसंयोगोभवतीत्यर्थः अस्मिन्नेवपूर्वोक्तयोगेपापाअस्तु

मग्रहाः चतुर्थाश्चतुर्थस्थानस्थास्तस्यैव शत्रोः विनिवर्त्तनाय मतीपगमनाय भवंति शत्रुर्विनिवर्त्तनइत्य
र्थः १० अथान्यद्गमनागमनाययोगांतरमाह नागच्छतीति अर्कःआदित्यः चंद्रः शशीतौलग्नाद्यदाचतु
र्थभवनस्थौ चतुर्थस्थानगतौभवतः तदापरचक्रंनागच्छतिनायातिशत्रुसमूहोनायातीत्यर्थः बुधगुरुशु-

स्थिरोदयेजीवशनैश्चरेक्षितेगमागमौनैववदेच्चपृच्छतः त्रिपं
चषष्ठारिपुसंगमाय पापाश्चतुर्था विनिवर्त्तनाय १० नागच्छतिप
रचक्रंयदाकर्कचंद्रौचतुर्थभवनस्थौ बुधगुरुशुक्राहिबुकेयदात
दाशीघ्रमायाति ११

क्राःहिबुकेचतुर्थस्थानेयदास्थिताभवंतितदापरचक्रंशीघ्रमाशुआयातीत्यर्थः ११ अथयोगांतरमाह मेषधनु
रिति एषांमेषधनुःसिंहदृषाणांमध्येयद्येकतमउदयस्थः तत्काललग्नगतोभवति चाइत्यथवा तात्कालिकास्त्र

षट्पं० १० श्मलग्नाद्धिबुके चतुर्थस्थाने एषांमध्यादन्यतमोभवति तेचग्रहैः सहिताः समेताः रहिताचातदातस्मिन्निव गमा

कालेशत्रुर्निवर्त्ततेप्रतीपंगच्छतीत्यर्थः १२ अन्यच्छत्रोरनागमनप्रकारमाह स्थिरराशाविति उदये तत्का २

ललग्नेस्थिरराशौतत्रैवशनिः सौरिः गुरुः जीवोवाभवतितदाशत्रुः रिपुः स्वस्थानान्नचलितः तत्रैवतिष्ठति अथवा

मेषधनुःसिंहवृषायद्युदयस्थाभवंतिहिबुकेवा शत्रुर्निवर्त्ततेतदाग्रहसहितावाविमुक्तावा १२

स्थिरराशौयद्युदयेशनिर्गुरुर्वास्थितस्तदाशत्रुः उदयेरविर्गुरुर्वाचरराशौस्यात्तदागमनं १३ ग्रहः

सर्वोत्तमबलोलग्नाद्यस्मिन्गृहेस्थितः मासैस्तत्तुल्यसंख्याकैर्निवृत्तिंयात्युरादिशोद १४

चरराशौलग्नगतेतत्रचरविःगुरुर्वाभवति तदाशत्रोरागमनं आगमः स्याद्भवेत् १३ अथयातुर्निवृत्तिज्ञानार्थयो-

गंश्लोकद्वयेनाह ग्रहइति सर्वोत्तमबलोग्रहः लग्नाद्यस्मिन्गृहेयावत्तमेस्थाने स्थितः सर्वोत्तमबलः प्रधानबलो

पेतः तत्तुल्यसंख्याकैः तत्तुल्यातत्समासंख्याप्रमाणंयेषांमासानांतैः यातुः जिगमिषोः निवृत्तिंनिवर्त्तनंप्रवा १०

सान्निर्दिशेत् वदेत् १४ चरांशस्थ इति तस्मिन् सर्वोत्तमवले ग्रहे चरांशस्थे चरराशिनवभागस्थे पूर्वोक्तकालमे
वं विनिर्दिशेत् तत्तुल्यसंख्याकैर्मासैः स्थिरभागांशकस्थे स्थिरनवांशस्थे तमेव कालं द्विगुणं द्व्यात्मकांशके द्वि
स्वभावनवांशके तमेव कालं त्रिगुणं वदेत् १५ अत्रैवमनंतरमाह यातुरिति विलग्नं पृच्छालग्नं तस्मात् जामित्रभ
वनं सप्तमस्थानं तस्याधिपतिः स्वामी स यदा यस्मिन् काले वक्रं विपरीतं गमनं करोति तं कालं यातुर्जिगमिषो राष्ट्रेराव

चरांशस्थे ग्रहे तस्मिन् कालमेवं विनिर्दिशेत् द्विगुणं स्थिरभागस्थे त्रिगुणं द्व्यात्मकांशके १५
यातुर्विलग्नाज्जामित्रभवनाधिपतिर्यदा करोति वक्रमावृत्तेः कालं तं ब्रुवते परे १६

र्त्तनस्य प्रवासान्निवृत्तिर्भवति अपरे आचार्याः कृष्णादयो ब्रुवते कथयंति वक्रं च ग्रहाणां यथासंभवं योज्यं तथा-
च यातुः पृच्छालग्नात्सप्तमभवनाधिपो यदा वक्री भवति तदा वक्तव्यः प्रवासनिवृत्तये कालः १६ अथ नष्टप्रोषितागम-
मने दिनप्रमाणमाह उदयेति उदयर्क्षमुदयलग्नं चंद्रर्क्षं चंद्रराशिः पृच्छाकाले यत्र चंद्रमाः स्थितस्तस्मात् उदयर्क्षा

च्चंद्रर्क्षं यावत्संख्यं भवति तावत्संख्यैर्दिनैः शत्रोरागमनं स्यात् यदि मध्य इति तयोर्लग्नचंद्रयोर्मध्ये न रेयदि क
श्चिद्ग्रहो न भवति तदैवं ग्रहसंभवे शत्रुरयत्नयमेव न यातीत्यर्थः १७ इति भट्टोत्पलविरचितायां षट्पंचाशिका
विवृत्तौ गमागमाऽध्यायो द्वितीयः २ अथ जयपराजयाध्यायो व्याख्यायते तत्रादावेव जयपराजयज्ञानमाह

उदयर्क्षाच्चंद्रर्क्षं भवति च यावद्दिनानि तावद्भिः आगमनं स्याच्छत्रोर्यदि मध्ये
न ग्रहः कश्चित् १७ इति षट्पंचाशिकायां गमागमाध्यायो द्वितीयः २ दशा
मोदयसप्तमगाः सौम्या नगराधिपस्य विजयकराः आरार्कीज्ञगुरुसिताः प्र
भंगदा विजयदा नवमे १

दशमोदयेति उदये लग्ने दशमसप्तमे प्रसिद्धे एतेषु स्थानेषु लग्नात्सौम्याः शुभग्रहाः गताः समवस्थिताः पृ
च्छालग्ने नगराधिपस्य पुरस्वामिनो राज्ञो विजयकराः विशेषेण जयं कुर्वंति आरो भौमः आर्किः सौरिः एतौ प्रभं

लग्नात्नवमेस्थानेस्थितौभ्रष्टुः प्रभंगदौप्रकर्षेणभंगंपलायनंददतः तथाज्ञोबुधः गुरुः जीवः सितः शुक्रः
एतेलग्नान्नवमेस्थानेस्थिताः विजयदाः विशेषेणाजयदाभवंति भ्रष्टुः संग्रामेविजयोभवतीत्यर्थः १ अथ-
नगरयायिनः कस्यविजयोभवतीत्येतत्परिज्ञानमाह पौरास्तृतीयेति पुरेभवाः पौराः नागराः पृच्छालग्ना
त्तृतीयभवनप्रभृतियद्राशिषट्कंअष्टमस्थानंयावत्तावन्नागराज्ञेयाः एतद्राशिषट्कंपौराणांशुभाशुभलेज्ञे

पौरास्तृतीयभवनाद्धर्माद्यायायिनः शुभैः शुभदाः

यमित्यर्थः धर्माद्यायायिनः धर्मान्नवमस्थानात्प्रभृतिराशिषट्कं द्वितीयंस्थानंयावत्तावत्स्थिताज्ञेयाः एत-
द्राशिषट्के यायिनांशुभाशुभलेज्ञेयाइत्यर्थः येनादौयात्राभुद्योगः कृतः सयायिनः पश्चात्कृतः सनागरः
वाशब्दोत्रचार्थेज्ञेयः शुभैः शुभदाः एतेयथाविभागकल्पिताराशयोयस्यशुभैः सौम्यग्रहैः संफल्ताभवं
तितस्यशुभदाभवंतीत्यर्थः अर्थाद्यस्यपापैः संफल्ताः तस्यपराजयदाः तथाचप्रश्नेधर्माद्यैश्चक्रदलैर्या

थिनो नागरास्तृतीयादौ विजयः सौम्यफले स्यात् नरभागे क्रूरसंयुते भंगः तथाचास्मदीये प्रश्नज्ञाने नवसाद्ये
चक्रदले विज्ञे योथायिनस्तृतीयादौ योगः क्रमसदक्षभागे विजयः पुरे भंग इति अर्थादेवभागद्वयेपि पाप-
सौम्यैर्युक्ते व्यामिश्रं फलं भवति न जयो न पराजय इति व्ययदशमायेपापा इति व्ययं द्वादशं दशमं प्रसिद्धं आय
मेकादशं समाहारे एकवद्भावः तत्र पापाः पापग्रहाः पृच्छालग्नात्स मवस्थिता भवंति तदा पुरस्य नगरस्य ने

व्ययदशमाये पापाः पुरस्य नेष्टाः शुभा याताः २
नृराशिसंस्थात्वुदये शुभाः स्युर्व्ययायसंस्थाश्च यदा भवंति

ष्टा न शुभा भवंति यातुः यत्पुरं तस्य न शुभाः यातुः पुनः शुभकराः उपचयकरा इत्यर्थः २ अथ संधिविरोध-
ज्ञानार्थं योगांतरमाह नृराशीति नृराशयः पुरुषराशयः पुरुषाकृतयो राशयः नृराशयः मिथुनकुंभतु
ला कन्याः तथाच आचार्य एवज्ञापकः तुलाथ कन्या मिथुनो घटश्च नृराशय इति शुभाः सौम्यग्रहाः बु
धशुक्रबृहस्पतयः एते उदये पृच्छालग्ने स्थिताः स्युः भवेयुः अथवा त एव सौम्यग्रहाः नृराशिसंस्था

व्ययायसंस्थाश्चभवंति व्ययंद्वादशंआयमेकादशंचशब्दः समुच्चयेअनयोरपिसंस्थाः समव-
स्थितायदाभवंति तदाआशुक्षिप्रमेवनृपाणांसंधिः संधानंवदेत् ब्रूयात् पापैरिति पापारविभौ
मन्दानिक्षीणचंद्राः द्विदेहाः द्विस्वभावराशयः पापैरशुभग्रहैः द्विदेहोपगतैः द्विस्वभावराशिषु
समवस्थितैर्नृपाणांएवंविरोधंविग्रहंप्रवदेत् ३ योगांतरमाह केंद्रोपगताइति केंद्राणि लग्नचतु

तदाशुसंधिंप्रवदेन्नृपाणांपापैर्द्विदेहोपगतैर्विरोधं ३ कें
द्रोपगताःसौम्याःसौम्यैर्दृष्टानृलग्नगाःप्रीतिं कुर्वंतिपापदृ
ष्टाःपापास्तेष्वेवविपरीतं ४ र्थसप्तमदशमानि तेषूपगताःसमवस्थि-

ताः सौम्यैः शुभग्रहैः अथवातएवसौम्याः नृलग्नगाः नृराशिषु भागुक्तेषु स्थिताः सौम्यैः शुभग्रहैश्च
दृष्टाः परस्परमवलोकयंतीत्यर्थः एवंविधाः प्रीतिंसंधिंकुर्वंति निवृत्तिंप्रापयंतितेषु केंद्रेषुसमव-

षट्प
१३

स्थिताः पापाः ते च पापदृष्टाः परस्परं पापैरवलोकिताः विपरीतं विपर्ययं अप्रीतिं विग्रहं कुर्वंतीत्यर्थः ४
अथ सेनागमनज्ञानमाह द्वितीयेति प्रश्नलग्नाद्यदा द्वितीये वा यथा तथा गुरुः शुक्रो जीवः सितो भवतः तदा च-
मूः सेना आश्वेवागच्छति क्षिप्रमेवायाति प्रवासी अन्यदेशस्थः आश्वेवागच्छति न संशयः निर्विकल्पं यथा

द्वितीये वा तृतीये वा गुरुः शुक्रो यदा तदा आश्वेवागच्छते सेना प्रवासी च
न संशयः ५ इति षट्पंचाशिकायां जयपराजयाध्यायः तृतीयः ३ ॥
केंद्रत्रिकोणेषु शुभस्थितेषु पापेषु केंद्राष्टमवर्जितेषु ॥

स्यात्तथा ग्रहाणां क्रमविवक्षार्थं कदाचित् द्वावेव द्वितीये वा द्वावेव तृतीये वा एको द्वितीये वा तृतीये प्येक एवेति
५ इति षट्० जय० ३ अथ नारुफभारुफ भलक्षणाध्यायो व्याख्यायते तत्रादावेव प्रष्टुः शुभाशुभज्ञा
नमाह केंद्रेति केंद्राणि लग्न १ चतुर्थ ४ सप्तम ७ दशमानि १० त्रिकोणसंज्ञे नव पंचमे शुभाः सौम्य-

अ० प
३

ग्रहाः एतेषु त्रिकोणेषु शुभस्थितेषु शुभाः स्थितायेषु सौम्यग्रहफलेष्वित्यर्थः शुभान्वितेष्विति पाठः
तथा पापेषु पापग्रहेषु केंद्राष्टमस्थानं वर्जयित्वा अन्यत्र समवस्थितेषु सत्सु नराणां मनुष्याणां सर्वार्थसि
द्धिं वदेत् सर्वेषां निःशेषाणां अर्थानां सिद्धिं साधनं वदेत् ब्रूयात् विपर्ययइति एषु पापसौम्येषु विप
र्यये विपरीते अन्यथास्थितेषु विपर्ययो वैपरीत्यमेव स्याद्भवेत् एतदुक्तं भवति यदा पापाः केंद्रत्रिकोणा-

सर्वार्थसिद्धिं प्रवदेन्नराणां विपर्ययस्थेषु विपर्ययः स्यात् १ त्रिपंचलाभा
स्तमयेषु सौम्या लाभप्रदानेष्टफलाश्च पापाः तुलाथ कन्या मिथुनं घटश्च
नृराशयस्तेषु शुभं वदंति २

ष्टमेषु भवंति सौम्याः केंद्रत्रिकोणाष्टमवर्ज्यमन्यत्र भवं-
ति तदा सर्वार्थानाम सिद्धिं प्रवदेत् १ अथ लाभालाभज्ञानमाह त्रिपंचेति तृतीयपंचमेस्थाने प्रसिद्धेला
भएकादशं अस्तमयं सप्तमं एतेषु सौम्याः शुभग्रहाः अष्टुर्लाभप्रदाः एष्वेव त्रिपंचलाभास्तमयेषु पापा अशु

भग्रहाः नेष्टफलाः अनिष्टमशुभं फलं कुर्वंति अर्थनाशं संभारभंगं वा इत्यर्थः तुलेति तुलकन्यामिथुनाः प्रसि-
द्धाः घटः कुंभः एतेनरराशयः पुंराशयः एतेषु लग्नेषु सौम्यग्रहाधिष्ठितेषु शुभं भद्रं मुनयो वदंति कथंती-
त्यर्थः २ अन्ययोगांतरमाह स्थानप्रदा इति सौम्याः शुभग्रहाः लग्नाद्दशमे सप्तमे च स्थाने गताः समवस्थिताः
प्रष्टुः स्थानप्रदाः स्युः स्वशब्देन धनमुच्यते तेन लग्ने प्रसिद्धे तेषु स्थिताः सौम्याः मानार्थदाः स्युः भवेयुः पा

स्थानप्रदा दशमसप्तमगाश्च सौम्या मानार्थदाः स्वसुतलग्नगता भवंति
पापा व्ययायसहिता न शुभप्रदास्तु लग्ने शशी न शुभदो दशमे शुभश्च ३

पा व्ययेति पापा अशुभग्रहाः व्ययो द्वादशं अर्थ एकादशं तयोर्द्वयोः सहिताः न शुभप्रदाः स्युः भवेयुः न शुभफ-
लं प्रयच्छंति लग्न इति पापा इत्यनुवर्तते शशी चंद्रः पापो लग्ने स्थितः न शुभ इति शुभं फलं न ददाति दशमे स्थाने स-
मवस्थितः पापरूपोपि शुभफलो भवति श्रेयस्करो भवतीत्यर्थः ३ अन्यच्च शुभाशुभज्ञानमाह इंद्विति

इद्विति द्विशब्देन द्वितीयंस्थानमुच्यते सप्तमदशमेप्रसिद्धे आयंएकादशंरिपुस्थानंषष्ठंत्रिशब्देन तृतीयंस्था
नमुच्यते एतेषुद्वितीयतृतीयसप्तमदशमायरिपुषुसंस्थित : तमिंदुंचंद्रं गुरुर्जीव : पश्येत्तदाप्रष्टु : शुभफलं-
लाभादिकं प्रमदादिकंस्त्रीहेतुकंस्याद्भवेत् लग्नत्रिधर्मेति लग्नंपृच्छालग्नंत्रिशब्देन तृतीयस्थानं धर्मस्थानंनव

इंदुंद्विसप्तदशमायरिपुत्रिसंस्थंपश्येद्गुरु : शुभफलंप्रमदाकृतंस्यात्
लग्नत्रिधर्मसुतनैधनगाश्चपापा : कार्यार्थनाशभयदा : शुभदा : शुभा
श्च ४

मंसुतस्थानंपंचमंनैधनमष्टमंएतेषुस्थानेषुपापा : पापग्रहा : गता : समवस्थिता : प्रष्टु : कार्यार्थनाशभय
दा : कार्यस्यकृत्यस्यअर्थस्यधनस्यनाशंविघातंभयंभीतिंददतीत्यर्थ : शुभदाशुभाश्चेति एषेवलग्नादिषुस्था
नेषुशुभा : सौम्यग्रहा : समवस्थिता : शुभदा : शुभफलप्रदाइत्यर्थ : ४ ७ ६७

अथ नारीगार्नस्य शुभाशुभज्ञानमाह शुभेति शुभग्रहा बुधगुरुशुक्राः विलग्नंपृच्छालग्नंसप्तमाष्टमपंच
मस्थानानि प्रसिद्धानि एतेषु यथासंभवं शुभग्रहाः समवस्थिताः तेच निरीक्षिताः सौम्यैः शुभग्रहैरेव दृष्टाः
एतदुक्तं भवति शुभग्रहाः दृष्टस्थानस्थाः परस्परं पश्यंति यदा तदा एष योगो न केवलं यावन्निशाकरश्चंद्र-
मास्त्रिषट्दशगयेच स्याद्भवेत् तृतीयषष्ठदशमानि प्रसिद्धानि आयमेकादशमेतेषां अन्यतमे चंद्रमा भ

शुभग्रहाः सौम्यनिरीक्षिताश्च विलग्नसप्ताष्टमपंचमस्थाः त्रिषट्दशा
येच निशाकरः स्याच्छुभं वदेद्रोगनिपीडितानां ५ इति वराहमि॰ च-
तुर्थोध्यायः समाप्तः

वति तदा रोगनिपीडितानां व्याधिगृहीतानां शुभमारोग्यं वदेत्
ब्रूयात् अथो देवयोगासंभवे सत्यशुभं वदेदिति योगे सति शुभं ब्रूयात् ५ इति श्रीभट्टोत्पल विरचितायां ष
ट्पंचाशिकाविवृत्तो शुभाशुभाध्यायश्चतुर्थः समाप्तः ४

अष्टकनाष्टप्रवासचिंताध्यायोव्याख्यायते तत्रादावेवागमनार्थं योगमाह दूरगतस्येति स्तनस्थानं पंचमं धनस्था
नं द्वितीयं सहजस्थानं तृतीयं एतेषु स्थानेषु लग्नात्तात्कालिकात् ग्रहैरादित्यादिभिः सर्वैः समवस्थितैः दूरगतस्य वि-
प्रकृष्टस्थितस्य आगमनं संप्राप्तिं वदेत् सौम्यैर्नष्टप्राप्तिमिति सौम्यैः सौम्यग्रहैः बुधगुरुसिताक्षीणचंद्रैः तेष्वेवस्था
नेषु व्यवस्थितैः नष्टस्यापहृतस्य वस्तुनः प्राप्तिं लाभं वदेत् तस्यैव प्रवासो नष्ट आसीत् स एव प्रवासी नष्टो ऽदर्शनं गतः

दूरगतस्यागमनं स्तनधनसहजस्थितैर्ग्रहैर्लग्नात्
सौम्यैर्नष्टप्राप्तिं लघ्वाग मनं गुरुसिताभ्यां १

तद्दर्शनं भवतीत्यर्थः लघ्वागमनं गुरुसिताभ्यामिति गुरुर्बृहस्पतिः सितः शुक्रः आभ्यामेष्वेवस्थानेषु सम-
वस्थिताभ्यां लघ्वागमनं लघुनाल्पेनैव कालेन प्रवासिना मागमनं वदेत् १ अथ योगांतरमाह जामित्रेति जामित्रं स-
प्तमं सप्तमे स्थाने अथ षष्ठे वा पृच्छालग्नाद्यः समवस्थितः तथा च तुर्णां केंद्राणां च मध्यादन्यतमे केंद्रे वाक्पतिर्भवति

षट्पं· तदा प्रोषितस्य प्रवासितस्यागमनं प्राप्तिं विघातं जानीयात् त्रिकोणइति त्रिकोणे नवपंचमे ज्ञो बुधः सितः शुक्रः प्रश्नौ

१८ बुधेशुक्रेवा त्रिकोणयोर्नवपंचमस्थानयोरेकान्यतमस्थे द्वयोर्वा त्रिकोणस्थयोः प्रोषितागमनं विंद्यादिति २ ५

अथयोगांतरमाह अष्टमस्थइति निशानाथश्चंद्रमास्तस्मिन् प्रश्नलग्नादष्टमस्थे अष्टमस्थानं समवस्थिते कंटका

जामित्रेत्वथवाषष्ठे ग्रहः केंद्रेथवाक्पतिः प्रोषितागमनं विंद्यात्त्रिकोणेज्ञेसितेपिवा
२ अष्टमस्थे निशानाथे कंटके पापवर्जिते प्रवासीक्षरवमायाति सौम्यैर्लाभसमन्वितः ३

नि केंद्राणि लग्नचतुर्थसप्तमदशमानि तैः पापवर्जितैः अशुभग्रहवर्जितैः प्रवासी पथिकः क्षरवेनाक्लेशेनायाति आगच्छति सौम्ये शुभग्रहे केंद्रस्थे प्रवासी लाभसमन्वितः लाभफलः क्षरवमायाति ३ अन्ययोगांतर-

१६ माह पृष्ठोदयेति पृष्ठोदयाः मेषकर्कटधनिमकरमीनाः पृष्ठोदये पृच्छालग्ने एतेषामन्यतमे तस्मिंश्च पाप-

निरीक्षिते अशुभग्रहानवलोकिते वाशब्दोत्रचार्थे एवंविधेयोगे प्रवासिनोवधस्ताडनंबंधोबंधनंभवेत् अथ
वापापाअशुभग्रहाः लग्नात्तृतीयस्थानेस्थिताः सर्वएतेचसौम्यैः शुभग्रहैरदृष्टाअनवलोकितास्तदाप्रवासि
नोनष्टास्तस्मात्स्थानादन्यदेशंगताः अथवापापालग्नाद्रिपुस्थानेवागतास्तेचसौम्यैरदृष्टास्तदाप्रवासिनोमुषि
ताश्चोरैर्यपत्दताः स्फर्भवेफः वाशब्दोयोगानांविकल्पार्थः वधबंधदाःस्फरितिपापानांविशेषणं ४ अधुना

एष्वोदये पापनिरीक्षितेवापापास्तृतीयेरिपुकेंद्रगेवा सौम्यैरदृष्टावधबंधदाःस्युर्नष्टा
विनष्टामुषिताश्चवाच्याः ४ गृहोविलग्नाद्यतमेगृहेतु तेनाहतान्द्वादशराशयः
स्युः तावद्दिनान्यागमनस्यविंद्यान्निवर्तनैर्वक्रगतेग्रहेस्तु ५ इतिषट्पं० प्र० चिंताध्या० ५

प्रवासिनामागमनकालज्ञानं ग्रह ग्रहोविलग्नाद्येति विलग्नात्पृच्छालग्नाद्यतमेयावत्संख्येराशौयः कश्चिन्तग्र
हः स्थितः सचस्पष्टगतिस्तितेतेनतत्प्रमाणेनद्वादशराशयः आहतागुणिताः कार्याः एतदुक्तंभवति द्वादशसंख्या

मंकं स्थाप्य लग्नात्प्रभृतिष्टांतरं राशिसंख्यया गुणयेत् तत्र यावत्संख्या भवंति तावत्संख्यानि दिनानि प्रवासि
नः आगमनस्य विंद्याज्जानीयात् तावद्भिर्दिनैः पथिक आगच्छतीत्यर्थः निवर्त्तनं वक्रगतेरिति अथ सग्रहो
वक्रगतिः प्रतीपगतिस्तदा तावत्संख्यैर्दिनैः प्रवासिनः प्रवासान्निवर्तनं भवति ५ इति भट्टोत्पलवि० प्रवासचि

स्थिरोदये स्थिरांशे वा वर्गोत्तमगतेपि वा स्थितं तत्रैव
तद्द्रव्यं स्वकीयेनैव चोरितं १ ५ ५

ताध्यायः पंचमः ५ अथ नष्टप्राप्त्यध्यायो व्याख्यायते तत्रादावेव चौरज्ञानमाह स्थिरोदय इति स्थिरा वृषसिं
हवृश्चिककुंभाः एषामन्यतमस्योदये तत्काललग्नतां प्राप्ते अथवा यस्य कस्यचिद्राशेरुदये तत्कालं स्थिरनवांश
कवर्त्तमाने अथवा यस्य कस्यचिद्राशेर्वर्गोत्तमनवांशकोदये वर्गोत्तमनवांशाश्चरादिषु प्रथममध्यमपर्यंतगाः इ
ति वर्गोत्तमनवांशकानां लक्षणं प्रोक्तं एवं लग्नस्य वर्गोत्तमगते नवांशके यावदपहृतं द्रव्यं धनं तत्स्वकीयेनात्मीयेनै

यकेनचिच्चोरितमपहृतं तच्चतत्रैवतस्मिन्नेवस्थानेस्थितं अन्यथाअपरेणापहृतं तस्मात्तत्स्थाना
च्चलितमिति १ अधुनास्थानज्ञानमाह आदिमध्येति द्रेष्काणाः प्रथमपंचमनवाधिपानामितिद्रेष्काण
लक्षणंप्रागुक्तं आदिद्रेष्काणः प्रथमः मध्येद्वितीयः अवसानेतृतीयः विलग्नंपृच्छालग्नंविलग्नतः विल-
ग्नात् तात्काललग्नादित्थंभूतेषु द्रेष्काणेषुयथासंख्यंहृतंधनंवित्तंद्वारदेशेतथामध्येगृहांतेचधनंस्थितंवदेत्

आदिमध्यावसानेषुद्रेष्काणेषुविलग्नतः द्वारदेशेतथामध्येगृहांतेचवदेद्धनं २ पूर्णःशशी
लग्नगतःशुभोवाशीर्षोदयेसौम्यनिरीक्षितश्च नष्टस्यलाभंकुरुते तदाशुलाभोपयातो
बलवान्शुभश्च ३

एतदुक्तंभवति लग्नस्यप्रथमद्रेष्काणोदयेहृतंधनं द्वारदेशेस्थितंवदेत् द्विती-
येद्रेष्काणोदयेगृहमध्येब्रम्हस्थानसमीपे तृतीयेद्रेष्काणोदयेगृहांतेवेश्मपश्चिमभागे वदेत् ब्रूयादिति २ अ-
धुनालाभालाभज्ञानमाह पूर्णःशशीति पूर्णःपरिपूर्णमंडलः शशीचंद्रः सचलग्नगः पृच्छालग्नेसमवस्थितः

प्र॰पं॰
१८

अथवाशीर्षोदयेलग्नगतेनत्रैवशुभः सौम्यग्रहः समवस्थितः सचसौम्यैः शुभग्रहैरेवनिरीक्षितोदृष्टः भवति
तदाआशुक्षिप्रमेवनष्टस्यापहृतस्यधनादेर्लाभंप्राप्तिंकुरुतेविधत्ते लाभइति अथवालग्नात्‌लाभचैकादशो-
स्थानेशुभः सौम्यग्रहः बलवान्वीर्यवानुपयातः प्राप्तोभवतितथापिचशब्दान्नष्टस्य आशुलाभंकुरुते अर्था-
देवोक्तयोगनामभावेहृतंनलभ्यतइति ३ अधुनादिग्ध्वनौः प्रमाणमाह दिग्वाच्येतिवाच्यादिशारविसि
तकुजराहुयमेंदुसौम्यवाक्पतयः इतिग्रहाणांदिशउक्ताः तत्रकेंद्रगतैर्ग्रहैर्दिगीशावाच्यावक्तव्याः तात्का

दिग्वाच्याकेंद्रगतैरसंभवेवावदेद्विलग्नर्क्षात् मध्याच्च्युतैर्विलग्नान्नवांशकैर्योजनावाच्या
४ इतिषट्‌ ६

लिकलग्नस्ययः कश्चिनग्रहः केंद्रेसमवस्थितः तस्य यादिक्‌तस्यां हृतंवित्तं
गतंवदेत्‌ तद्यथा सूर्येलग्नचतुर्थसप्तमदशमानामन्यतमस्थानस्थे पूर्वस्यामेवआग्नेय्यांशुक्रे भौमेदक्षिणस्या
राहौनैर्ऋत्यांसौरेपश्चिमायांचंद्रेवायव्यांबुधेउत्तरस्यांजीवेईशान्यामितिद्वयोर्बहुषुवा केंद्रगतेषुधिक-
बलादसंभवेवावदेद्विलग्नर्क्षात्‌ अजवृषमिथुनकुलीराः पंचमनवमेः सहेंद्राद्याइतिराशीनांदिशउक्ताः अ

मि॰श्र॰
७

१८

सत्पविद्यमाने केंद्रे ग्रहैर्विलग्नर्क्षात् विलग्नराशिनो दिशं वदेत् ब्रूयात् इति तद्यथा मेषसिंहधनुःषु लग्ने वृत्तं
वित्तं पूर्वस्यां दिशि गतं एवं वृषकन्यामकरेषु दक्षिणस्यां मिथुनतुलाकुंभेषु पश्चिमायां वृश्चिककर्कटमीने वृत्त
रस्यां मध्यात्स्फुटैरिति विलग्ने प्रश्नलग्ने तस्य नवांशका नवभागास्तैर्मध्यात्पंचमनवमांशकात्स्फुटैश्चलितैर्योज
नावाच्या एतदुक्तं भवति प्रश्नलग्ने प्रथमनवांशकात्प्रभृति पंचमनवांशकं यावद्गतैस्तावत् वृत्तं वित्तं तस्मिन्नेव-

विषमस्थिते र्कपुत्रे स्रुतस्य जन्मान्यथांगनायाश्च

देशो प्रागुक्तायां दिशि गतं वदेत् पंचमादंशकाद्ये यावंतो परतोंशकाः अतीतास्तावंति योजनानि तद्वित्तं प्रागुक्ता
यां दिशि गतमिति ४ इति श्रीभट्टोत्पल० नष्टप्र० ६ अथ मिश्रिकाध्यायो व्याख्यायते तत्रादावेव गर्भिणी पुत्रदु-
हितृजन्मज्ञानं वरस्य कन्यालाभज्ञानं चाह विषमस्थितेति अर्कपुत्रे शनैश्चरे प्रश्नलग्नाद्विषम स्थानस्थिते तृ-
तीयपंचमसप्तमनवमैकादशानि विषमस्थानानि एषामन्यतमस्थानस्थे ग्रहः सुतजन्म प्रादुर्भावं वदेत् तत्र

षट्पं. १९

त्रलग्नस्य कथं विषमस्थानस्य गणना क्रियते उच्यते अत्राचार्यो वराहमिहिरो ज्ञापकः तथाच विहाय लग्नं विष
मर्क्षसंस्थः सौरोपि पुंजन्मकरो विलग्नात् अथांगनायास्तु अन्यथा अन्यप्रकारेण स्थिते र्कपुत्रे लग्नादंगनायाः
स्त्रियः जन्म वदेत् तेन द्वितीयचतुर्थषष्ठाष्टमदशमद्वादशानां अन्यतमे स्थानस्थिते सौरे वरस्य नारी कन्या लभ्येति
वदेत् समवस्थिते लग्नात्समस्थानस्थे वामं विपरीतं न लभ्यत इत्यर्थः १ अधुना विवाहज्ञानमाह गुरुरविसौम्यै

लभ्या वरस्य नारी समस्थिते तोन्यथा वामं १ गुरुरविसौम्यै
र्दृष्टस्त्रिस्मरमदायारिगः शशी लग्नात्

रिति गुरुर्जीवो रविः सूर्यः सौम्यो बुधः एतैर्दृष्ट अवलोकितः कीदृशः त्रिस्मरमदायारिगः त्रिशब्देन तृतीयस्था
नं स्मरस्थानं पंचमं मदस्थानं सप्तमं आय एकादशं अरिस्थानं षष्ठं लग्नादित्येषां स्थानानामन्यतमस्थाने गतः
समवस्थितः शशी चंद्रो गुरुरविसौम्यैर्दृष्टो यदि भवति तदा प्रष्टुर्विवाहस्य पाणिग्रहणस्य कर्त्ता विधाता भवति १९

त्रिकोणकेंद्रेष्विति अथवासौम्याः शुभग्रहाः त्रिकोणकेंद्रेषु नवपंचमलग्नचतुर्थसप्तमदशमेषु यथासंभ
वं भवंति तदाप्रष्टुः विवाहो भवतीत्यर्थः वाशब्दोन्ययोगव्यवच्छेदकार्थः २ अधुनावर्षासमये वृष्टिज्ञान-
माह चंद्रार्कयोरिति चंद्रः शशी अर्कः आदित्यः अनयोः सप्तमगौसितार्कीशुक्रशनीयथासंभवंयदाभवतः
अथवाविलग्नादेव तेनैवप्रकारेण तावेवसितार्की द्वितीयस्थाने दुश्चिक्येवा भवतस्तयोर्वास्थानयोस्तदावर्षाकृदृष्टि

भवतिच विवाहकर्त्ता त्रिकोणकेंद्रेषु वासौम्याः २ चंद्रार्कयोः सप्तमगौसितार्कीसुखे
ष्टमेवापितथाविलग्नात् द्वितीयदुश्चिक्यगतौनथाच वर्षाकृदृष्टिंप्रवदेन्नराणां ३
सौम्याजलराशिस्थास्तृतीयधनकेंद्रगाः सितेपक्षे
वर्षणंवदेत् ३ अधुनाप्रष्टुः प्रश्नकाले वृष्टिज्ञान
माह सौम्याइति कर्कमीनमकरकुंभाः जलराशयः सौम्याः शुभग्रहाः जलराशिषु स्थिताः सितेपक्षे शुक्लेमासार्द्धेषु
नरयं विशेषः तृतीयधनकेंद्रगायदिभवंति तृतीयद्वितीयलग्नचतुर्थसप्तमदशमानि एतेषु यथासंभवंगताः वाश

व्दोन्ययोगायेक्षायां अथवा उदयगते चंद्रे तत्र जलराशिस्थे पृच्छायां च वर्षास्वृष्टिं प्रवदेत् ४ अथ ग
र्भिणीनां किं जायत इत्येतज्ज्ञानमाह पुंवर्गेति पुंस्त्रीक्रूराविति राशीनां पुंस्त्री संज्ञा जातकेऽउक्ता :मेष
मिथुनसिंहतुलाधन्विकुंभाः पुंराशयः शेषास्त्रीराशयः वर्गलक्षणं प्रागुक्तं पुंवर्गे पुरुषराशिवर्गे लग्ने ग
ते तत्काललग्नतां प्राप्ते तस्मिन् पुंग्रहदृष्टे नरग्रहावलोकिते क्लीबपती बुधसौरी चंद्रसितौ योषितां नृणां शेषा-

चंद्रे वाप्युदयगते जलराशिस्थे वदेद्वर्षं ४ पुंवर्गे लग्नगते पुंग्रहदृष्टे बलान्विते
पुरुषः युग्मे स्त्रीग्रहदृष्टे स्त्री बुधयुक्ते तु गर्भयुता ५

इति ग्रहाणां पुंस्त्रीनपुंसकत्वमभिहितं तेन पुंग्रहा रविभौमजीवाः एतेषामन्यतमेन लग्नगते दृष्टे तस्मिं-
श्च तथाभूते लग्ने बलान्विते वीर्ययुक्ते च पुरुषो जायते अधिपयुतो दृष्टो वा बुधजीवनिरीक्षितश्च यो राशिः स
भवति बलवान् यदा दृष्टोपि वा शेषैरिति लग्नबलमुक्तं युग्मे स्त्रीग्रहदृष्ट इति युग्मे युग्मराशौ स्त्रीसंज्ञके वृष
दौ गते स्त्रीग्रहदृष्टे स्त्रीग्रहौ चंद्रसितौ ताभ्यामन्यतमेनावलोकिते बलयुक्ते च स्त्री कन्या जायते सामान्य प्रश्न

लग्नेबुधयुतेबुधेनसंयुक्तेस्त्रीगर्भयुतासगर्भावर्ततेअद्यापिनप्रसूयतइत्यर्थः ५ अथप्रष्टुःकीदृशीपुरु
षोवाचेनसितवर्ततइत्येतत्परिज्ञानमाह कुमारिकामिति शुक्लप्रतिपत्प्रभृतिदशम्यंतंयावत्शशीबालः
एकादशीप्रभृतिकृष्णापंचमीयावत्युवाषष्ठ्याद्यमावास्यांतंयावत्वृद्धः तत्रपृच्छालग्नंयदिसबालश्शा-
शीबालश्चंद्रःपश्यतिलग्नेवातथाभूतःस्थितःतदाप्रष्टुःकुमारिकांवदेत् एवमेवबुधःपश्यतितत्राव-

कुमारिकांबालशशीबुधश्चवृद्धांशनिःसूर्यगुरुप्रसूतां स्त्रीकर्कशांभौम
सितौविधत्तएवंवयस्यात्पुरुषेषुचैवं ६

स्थितःतथापिकुमारिकांअर्थादेवयौवनस्थेचंद्रेयौवनोपतांवृद्धेवृद्धामितिकेचित्बालांकुमारींचशशीबुध
श्चेतिपठंतिशशीबालांकरोतिआषष्ठ्यंयावत्आयुर्दर्शनेयावदित्यर्थः बालांस्त्रियंबुधःकुमारिकामनूढां
करोति एवंशनिःसौरिःविगतयौवनांजराभिभूतांकरोतिसूर्योर्कःगुरुर्बृहस्पतिःएतौप्रसूतांप्रसवयु
तांस्त्रियंविधत्तःकुरुतःभौमोंगारकःसितःशुक्रःएतौकर्कशांअतिदारुणांस्त्रियंकुरुतःएवमनेनप्रका

रेणवय:शरीरावस्थास्यात्भवेद् पुरुषेषुचैवमिति पुरुषेष्वपिपृच्छासमयेप्रष्टुः वयोज्ञानमेवमनेनप्रकारे
णवदेत् ६ अथपृच्छांपृच्छति कस्यसंबंधिनीचिंतामेमनसिवर्तनेइत्येतत्परिज्ञानमाह श्लोकद्वयेनआत्मसम
मिति ग्रहैरादित्यादिभिःसबलैर्लग्नगतैर्लग्नस्थितैः प्रष्टुःआत्मसमंस्वशरीरतुल्यंकश्चित्मनसिवर्ततइति
तत्कार्यवक्तव्यमित्येवलग्नात्सहजस्थितैः तृतीयगैःभ्राताबंधुःसुतगैः पंचमस्थानस्थैःसुतःपुत्रःचतुर्थ

आत्मसमंलग्नगतैर्भ्रातासहजस्थितैःसुतःसुतगैः मातावाभगिनीवाच
तुर्थगैःशत्रुगैःशत्रुः ७ भार्यासप्तमसंस्थैर्नवमेधर्माश्रितोगुरुर्दशमे

गैःचतुर्थस्थानस्थ:माताजननीभगिनीस्वसाचेतिवाच्यंशत्रुगैः षष्ठस्थानस्थैः रिपुचिंता ७ भार्येतिलग्ना
त्सप्तमस्थानस्थितैःसबलैर्ग्रहैभार्यापत्नीवाच्यानवमेनवमस्थानस्थैः धर्माश्रितोधर्मकृत्इतिचिंतावाच्या
दशमेगुरुराचार्यइतिस्वांशपतिरित्यादिस्वश्चासावंशश्चस्वांश:आत्मीयोनवमभागस्तस्यपतिःस्वामीपृच्छा
लग्नेनत्कालंयोनवांशःकउदितःतस्यनिर्यग्लग्नस्थोभवतितदाप्रष्टुःआत्मचिंतेतिवाच्यं अथस्वांशपतिर्भिन्नं त

त्काललग्नेस्थितंतत्तदामित्रंचिंतितमितिवाच्यं अथस्वांशपतिः शत्रुः रिपुः तत्कालंलग्नेस्थितः तदाशत्रुचिंता
गतेतिवाच्यं अथनिर्दिष्टस्थानेषुद्वौग्रहौबहवोवाभवंति तदातेषांमध्याद्योबलयुतः सयत्रस्थितः तंप्रष्टुः
चित्तेगतंस्थितमितिवाच्यं तथैवतेनैवप्रकारेणयथाभिहितेषुबलयुक्तेषुवीर्यवत्सु मध्यात्कार्यंवाच्यं शत्रु
मंदसितौसमश्चशशिजोमित्राणिशेषारवेरित्यादिनाग्रंथेचजातकेमित्रशत्रुविभागः प्रदर्शितइति ८ अथना-

स्वांशपतिर्मित्रशत्रुषुतथैववाच्यंबलयुतेषु ८ चरलग्नेचरभागेमध्याद्भ्र
ष्टेप्रवासि चिंतास्यात् भ्रष्टःसप्तमभवनात्पुनर्निवृत्तोयदिनवक्री ९

प्रवासचिंताज्ञानमाह चरलग्नइति चराणांमेषकर्कटतुलामकराणामन्यतमेलग्नेतत्रतत्कालंचर-
भागेचरनवांशकेउदितस्मिंश्चरलग्नेमध्यात्पंचमनवांशकात् भ्रष्टेच्युतेषष्ठादिकमंशंतत्रवर्ततइत्य
र्थः प्रष्टुः प्रवासचिंतास्यात्भवेत् प्रवासनिमित्तंचिंताभवेदित्यर्थः अत्रैवनिश्चयमाह भ्रष्टइति स
प्तमभवनंपृच्छालग्नात्सप्तमोराशिस्तस्मात् तत्कालेयदिकश्चिद्ग्रहोभ्रष्टः च्युतः चलितः सच-

भौमादिकस्तदाप्रवासीपुनर्निवृत्तोनिवर्त्तत इत्यर्थः प्रवासचिंतातेन किंतुनयास्यतियदिनवक्रीतियोसौस
समभवनाकृष्टः ग्रहः सयदिवक्रीप्रत्तीपगतिर्नभयति तदानिवृत्तएववाच्यः अथवक्री तदानृत्तोया
स्यतीतिवाच्यं ९ अथकीदृश्यास्त्रियासहमेसंयोगआसीदित्येतत्ज्ञानमाह अस्तेरविसितवक्रैरिति

अस्तेरविसितवक्रैः परजायांस्वांगुरौबुधेवेश्यां ·

रविरादित्यः सितः शुक्रः वक्रोंगारकः एतेषामन्यतमेपृच्छालग्नादस्तेसप्तमेस्थानेपरजायांपरपत्नीं-
परभार्ययासहसंयोगआसीत् एवंगुरौजीवेस्थितेस्वामात्मीयांस्त्रियंइतिप्रवदेत् बुधेवेश्यांसाधार
णांस्त्रियं चंद्रेचैवंसाधारणस्त्रियमेववदेत् तथानेनैवप्रकारेणसौरेशनैश्चरेसप्तमेंत्यजातीनांनिकृष्ट

जातीनांस्त्रियंअगम्यामितिप्रवदेत् वय: शशिवदिति तासांसर्वासांस्त्रीणांशारीरावस्थां चंद्र वद्वय: शारीरावस्थांप्रवदेदिति बालचंद्रे बालांयौवनस्थे यौवनोपेतां वृद्धे वृद्धां चंद्र प्रविभाग: प्रागेव दर्शित इति १० अथरोगार्तस्यपरदेशस्थितिज्ञानमाह मंदइति मंद:सौरि: सच पापसमे तोरविभौम-

चंद्रेचवय:शशिवत्प्रवदेत्सौरेस्त्यजातीनां १० मंद: पापसमेतो लग्नान्नवमेऽशुभैरफलदृष्ट: रोगार्त्त: परदेशेचाष्टमगोमृत्युकरएव ११

क्षीणचंद्राणामन्यतमेनयुक्त: तथाभूतोलग्नात् पृच्छालग्नात्नवमेस्थानेस्थितस्तत्रच शुभैरयुतदृष्ट:त त्रचशुभग्रहाणामन्यतमेननयुक्तोनाप्यवलोकित: तदारोगार्त्त :रोगोज्वरादिस्तेनार्त्त:पीडित :परदेशे- न्यस्मिन्ग्रामादौस्थित: तथातेनैवलक्षणेनयुक्त:सौरोलग्नादष्टमेस्थानेगत:समवस्थितस्तदातस्यैवरो

गार्तस्य मरणं करोति ११ अथ कश्चित्पृच्छति मदीयः पिता अन्यदेशस्थस्तत्र किमद्यापि तिष्ठति अथवा
न्यदेशं गत इति एतत्ज्ञानमाह सौम्ययुत इति अर्कः सूर्यः सौम्यैः शुभग्रहैर्युतः सहितः तेषामन्यतमेन

सौम्ययुतोर्कः सौम्यैः सदृष्टश्चाष्टमर्क्षसंस्थश्च तस्माद्देशादन्यं
गतः स वाच्यः पिता तस्य १२

च दृष्टोवलोकितो भवति तथाभूतो लग्नाच्चाष्टमर्क्षसंस्थितः तत्रस्थोष्टमस्थानमुपगतो भवति तस्माद्देशात्
ग्रामादिकादन्यदेशांतरं गतः तस्य प्रष्टुः पिता जनकः प्राप्त इति वाच्यः अन्यथा तत्रैव स्थितः १२

भभ्रुनाह्तस्यार्थस्यस्वरूपंतस्करकालदिग्देशानांज्ञानंतस्करस्यवयोरूपज्ञानंचाह अंशकादिति अं
कालग्नस्यतात्कालिकस्यनवभागाद्द्रव्यमपहृतंधातुमूलजीवाख्यंतत् ज्ञायते एतत्पूर्वमेवव्याख्यातं स

अंशकात्ज्ञायतेद्रव्यंद्रेष्काणैस्तस्कराःस्मृताःराशिभ्यःका
लदिग्देशावयोज्ञातिश्चलग्नपात् १२ इतिश्रीवराहमिहिरात्मज·
पृथुयशोविरचितायांषट्पंचा॰ मिश्राध्यायः ७ ७ ७

शेविलग्नेयदिवात्रिकोणइति तस्यचरराशितुल्योवर्णोवक्तव्यः तथाचलघुजातकेप्रोक्तं अरुणसित
तपादलपांडुविचित्राःसितेतरपिशंगाः पिंगलकर्बुरबभ्रुकमलिनारुचयोयथासंख्यमिति तस्यदीर्घ

मध्यन्हस्वत्वंनचांशकवशाज्ज्ञेयं तेनचकुंभमीनमेषवृषान्हस्वाः मिथुनकर्कटकधन्विमकरामध्या
हवृश्चिककन्यातुलादीर्घाः तथाचास्मदीयेप्रश्नज्ञाने मेषवृषकुंभमीनान्हस्वाफगकर्किचापधरमकरा
ध्याहरिफयणि तुलालयः स्मृतादीर्घाइति न्हस्वंपरिवर्तुलंमध्यमायतंदीर्घं अंशकपतौसबलेतः अशा
बलेस्कररवी नीचस्थितेस्तमितेवापिनष्टप्रायमेव एवमंशकाद्व्यंज्ञायते द्रेष्काणैर्लग्नत्रिभागैस्तस्करा
राः स्मृताः उक्ताः यादृशीद्रेष्काणस्याकृतिस्तादृशीएवतस्करस्यवक्तव्या तद्यथा मेषप्रथमेद्रेष्का
षः परशुहस्तः कृष्णोरक्तनेत्रः रौद्रः द्वितीयेद्रेष्काणेस्त्री लोहितांबरास्थूलोदरी दीर्घमुखैकपादा
येद्रेष्काणेपुमानक्रूरः कपिलोरक्तांबरः दंडहस्तः वृषस्यप्रथमेद्रेष्काणेस्त्रीकुंचितलूनकेशा स्थूलोद
दीर्घपादा द्वितीयेनरः कलावित् लांगलशस्त्रकर्मणिकुशलः तृतीयेनरोबृहत्कायः मिथुनस्यप्रथम
ष्काणेस्त्रीरूपान्विताहीनप्रजा द्वितीयेपुरुषः उद्यानसंस्थितः अपत्यरहितः कवचीधनुष्मान् तृती
मान्रत्नभूषितः पंडितोधनुष्मान् कर्कटप्रथमेपुरुषः हस्तीसदृशशरीरः सूकरमुखः द्वितीयेस्त्री यौं

नोपेताकर्कशाभरण्यस्था तृतीयेपुरुषः सर्पवेष्टितः नौस्थः स्रुवर्णाभरणान्वितः सिंहप्रथमेशा
लीसंस्थोगृध्रजंतुश्रुकाननः द्वितीयेपुरुषोधनुष्मान् नताग्रनासः तृतीयेनरः कूर्चीकुंचितकेशः दंड
स्तः कन्याप्रथमेस्त्रीपुष्पफला पूर्णेनघटेनोपलक्षितादग्धांबरागुरुकुलंवांछति द्वितीयेपुरुषोगृही
रवनिः श्यामोविस्तीर्णकार्मुकः तृतीयेस्त्रीगौरा कुंभकुचा घटहस्तादेवालयेप्रवृत्ता तुलाप्रथमेपुरुषः
लाहस्तः वीथ्यापणगतः उन्मत्तहस्तः भांडचिंत यति द्वितीयेपुरुषः कलशधरः गृध्रमुखोक्षुधितः
तश्च तृतीयेपुरुषः दीर्घमुखोधनुः पाणिः वृश्चिकप्रथमेस्त्री नग्नास्यानच्छना सर्पनिबद्धपादा म
मा द्वितीयेभर्तृकृते भुजंगावृतशरीरस्थानमुखान्यमभिवांछति तृतीयेपुरुषश्चिपिटवल्कः धनप्र
पुरुषोधनुष्मान् द्वितीयेस्त्रीसुरूपागौरवर्णा तृतीयेपुरुषोदंडहस्तः कूर्चीमकरप्रथमेपुरुषोरोम
स्थूलदंतोबंधभृत् रौद्रवदनः द्वितीयेस्त्रीश्यामा अलंकारान्विता तृतीयेपुरुषः दीर्घमुखोधनुष्मा
भप्रथमेपुरुषः गृध्रतुल्यमुखः सकंबलः द्वितीयेस्त्रीरक्तांबरा तृतीयेपुरुषः श्यामः मीनप्रथमे

णेपुरुषोनौस्थः द्वितीयेस्त्रीगौरानौस्था तृतीयेद्रेष्काणेपुरुषः नग्नः मांससर्पवेष्टितांगः
बृहज्जातकेवराहमिहिरेणप्रोक्तं एवंद्रेष्काणेः तस्कराउक्ताः इतिराशिभ्यउक्ताः इतिराशिभ्यः व
दिग्देशाः इतिराशीनांकालविभागः मेषाद्याश्चत्वारः सधन्विमकराः क्षपाबलाज्ञेयाइति ज
उक्तं तेनमेषवृषमिथुनकर्कटधन्विमकराणामन्यतमेलग्नेसंस्थेरात्रावपहृतं सिंहकन्यातुलाव
ककुंभमीनानामन्यतमे दिवालग्ने स्थिते दिवागतमिति एवंकालः दिक् मेषसिंहधनुषिपूर्वस्
तं वृषकन्यामकरेर्दक्षिणस्यांगतं मिथुनतुलाकुंभैः पश्चिमायां कर्कटवृश्चिकमीनैरुत्तरस्यां
शिगतमिति अथमेषलग्ने पृच्छाकालेस्थिते मेषेचरेभूमौवृषेतुलादौ मिथुनेगीतनृत्यस्थानेसंग्रा
मौवा कर्कटकेजलसमीपे सिंहेआरण्यभूमौ कन्यायांनौसमीपे तुलेआपणगृहे वृश्चिकेबिलेश्व
धनुषिसंग्रामेच प्राकारभूमौ मकरेजलसमीपे कुंभेशिल्पगृहेभांडोपस्करसमीपे मीनेजलसम
इति खचराश्चसर्वेइति बृहज्जातकेप्रोक्तं वयोजातिश्चलग्नपादिति लग्नपात् लग्नेशात् चोरस्य

२६॥षट्

प्रमाणंजातिंचवदेत् तथाचसंहितायां वयांसितेषांस्तनपान बाल्यव्रतस्थिता यौवनमध्यवृध्धा:
तीववृध्दा रविचंद्रभौमज्ञशुक्रवाग्मीनशनैश्वराणा मिति एवंचंद्रेलग्नपतौ शिशु: भौमेचतुर्थवर्षी
क: बुधब्रम्हचारीद्वादशाब्द: शुक्रेयौवनोपेत: द्वात्रिंशदब्द: गुरौमध्यवय: खपंचाब्द: सूर्येसप्तत
वृध्द: सौरेतीववृध्द: अशीत्यब्द: जाति: ब्राम्हणादि: जीवसितौविप्राणां क्षत्रस्यो ष्णगूविशांचं
शूद्राधिप: शशिसुत: शनैश्वर: संकरभवानाम् इति १२ इतिश्रीभट्टोत्पलविरचितायांषट्
शिकाविवृत्तौ मिश्रिकाध्याय: सप्तम: समाप्त: ७ ॥ ॥ ॥

हें पुस्तक मुंबईयेथें कृष्णाशास्त्रीगुर्जरयांणीआपलेग्रंथप्रकाशछापरवान्यांत छापिलें असे शके

इतिषट्पंचाशिकासमाप्त ·

॥ ॥

[OrderDescription]
,CREATED=21.05.20 11:04
,TRANSFERRED=2020/05/21 at 11:13:18
,PAGES=55
,TYPE=STD
,NAME=S0003020
,Book Name=M-3003-SHATPANCHASHIKA SATIK
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF

FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF

FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF

FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF
,FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF

FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
,